शारदा-गौरव-ग्रन्थ-माला... क्र. ५९

संस्कृत-मञ्जरी।

(पण्डित-रघुनाथदास-विरचिता)

★

संपादकः

श्रीअद्वैतचरण धलः

केन्द्रीय-संस्कृत-विद्यापीठम्, तिरुपतिः

★

महाशिवरात्रिः शके १८९९

मूल्यं ५ रूप्यकाः

उपोद्घातः

०–१ **रघुनाथदासः** — ख्रीष्टीयाष्टादश-शतकस्य प्रथमार्धे यदा अखिलेऽस्मिन् भारतवर्षे संस्कृतभाषा लुप्त-प्राया संजाता, तदानीम् उत्कलीय-स्वाधीन-नरपतीनां बाहुच्छायायां संस्कृतभाषा सुविकसिताऽऽसीत्। तत्रोत्कल-कटक-मण्डले **गडगडा-ग्रामे** सुविख्याते च कौण्डिन्य-कुले सकल-विद्या-विलासी पण्डितकुलतिलकः श्रीरघुनाथदासोऽजायत । तस्य पितृपिता-मह-महोदया अपि सकल-पूर्वजाः संस्कृत-साहित्ये धुरीणाः आसन्निति **उत्पाततरङ्गिण्यां** स्ववंश-वर्णन-प्रसङ्गे तेनैव वर्णितम्[1]। पिता चास्य श्रीवासुदेवः भुवन-विदिते पवित्र-पुरीक्षेत्रे श्रीजगन्नाथदेवस्य मुक्तिमण्डप-पण्डित-सदसि पुराणप्रवक्ताऽऽसीत् । माता च साऽम्बिकादेवी, या एतादृशं तनय-रत्नं प्रसूतवती । स्वस्य पित्रोश्च परिचयः तेन स्वसाहित्य-तत्त्व-विचारात्मके **साहित्यभूषणे** इत्थं दीयते —

कौण्डिन्य-कुल-जातेन वासुदेवाम्बिका-भुवा ।
साहित्यभूषणमिदं रघुनाथेन तन्यते ।। [2]

इति । स्वपितुः पितामहस्य चातुलप्रभावः अस्योपरि पतितश्चासीत् । अस्य पुत्रः श्रीजयदेवः 'कविचन्द्रे'ति राजदत्त-पदवीम् अलंचकार । पण्डितवर्यस्य श्रीरघुनाथस्य कुलदेवता (इष्टदेवता वा) भगवान् श्रीनृसिंह इति स्वकृतिषु तेनैव अलेखि । इदानीं यावत् न्याय-व्याकरण-कोष-धर्मशास्त्र-कामशास्त्र-तन्त्र - च्छन्द - साहित्यायुर्वेदादिषु विषयेषु तस्य चतुर्विंशति-ग्रन्थाः समुपलब्धाः । अन्येषां त्रयाणां ग्रन्थानां नामानि तेनैव स्वग्रन्थेषु उल्लिखितानि वर्तन्ते । एभ्योऽपि ग्रन्थेभ्यः तस्य प्रकाण्ड-पाण्डित्यं बहुशास्त्रदर्शित्वं च सम्यगेव प्रतिपाद्यते । यद्वदखिलशास्त्र-पारंगमो मल्लिनाथः शास्त्राणां टीकाकारो दृश्यते, तद्वत् रघुनाथोऽपि प्रसिद्धानां सकल-काव्यादीनां टीकाकारः । प्रसिद्धेषु माघ-नलोदय-भट्टि-रघुवंशादिषु काव्येषु तत्कृताः टीकाः उपलभ्यन्ते । न केवलं तत् अपि तु

---

(१) मया संस्कृतस्य साहित्यभूषणग्रन्थस्योपोद्घातः द्रष्टव्यः ।
(२) मया संस्कृतस्य साहित्यभूषणग्रन्थस्य प्रथमपृष्ठं द्रष्टव्यम् ।

भुवन-प्रसिद्धस्य अमरकोशस्य तत्कृता व्याख्या उत्कले सुप्रसिद्धाऽऽसीत्। उपलब्धेषु ग्रन्थेषु व्याकरण-विषये पञ्चग्रन्था दृश्यन्ते। प्रसिद्धस्य मम्मट-कृत-काव्यप्रकाशस्य टीकाऽपि एतेन कृता। परन्तु दौर्भाग्यमस्माकं यत् केवलं तृतीयोल्लासं यावत् इयं टीका लभ्यते। साहित्यदर्पणसदृशमेकं विस्तृतालोचन-संवलितमलंकारशास्त्रमपि पण्डितेन प्रणीतम्।

व्याकरणशास्त्रे कृतभूरिपरिश्रमस्यास्य प्रकाण्ड-पाण्डित्यं तत्कृतेषु वर्द्धमानप्रकाश-व्याख्यानादिषु दरीदृश्यते। अस्य चिन्ताधारा अतीव वैप्लविकी मनोवैज्ञानिकी चाऽसीत्। अनुदिनं संस्कृतं प्रति छात्राणां वैमनस्यमवलोक्य तस्य शास्त्रस्य काठिन्यमनुचिन्त्य च तेन सरलतया संस्कृतशिक्षणोपायाः उद्भाविताः।

यद्यपि तत्कृतेष्वन्येषु व्याकरण-ग्रन्थेषु एते उपायाः प्रयुक्ताः सन्ति तथाऽपि नूतनतया संस्कृतशिक्षाकाङ्क्षिनां कोमलमतिबालानां कृते तत्कृता **संस्कृत-मञ्जरी** परमोपयोगिनी। क्षुद्रातिक्षुद्र-वाक्य-माध्यमेन दैनिकव्यवहार-संवलितानां मनोभावानां परिप्रकाशनाय यथा बालाः प्रभवेयुः तादृशोपायाः अत्रालम्बिताः सन्ति। अत्र प्रभावोत्पादकेन प्रत्यक्षविधिना मनोवैज्ञानिकरीत्या च जीवनेन सह संबन्धं स्थापयित्वा प्राकृतिकतया (through direct method) शिक्षादानाय कवेश्चेष्टा दृश्यते। प्रायशः २५० वर्षेभ्यः प्राक् सरलतया संस्कृतशिक्षणाय एतेन चेष्टा कृताऽऽसीत्। इदानीं यथा सर्वे संस्कृत-विद्वांसः भविष्यन्ति तथा सकल-व्यवहार-जाता संस्कृतभाषा स्थापनीया। पुनश्च संस्कृतस्य प्रचुरप्रचाराय राष्ट्रभाषात्वेन प्रतिष्ठापनाय च सरलात् सरलतरेणोपायेन भाषायाः पाठ्यक्रमः सोत्साहं साग्रहं च प्रवर्त्तनीयः। अनेन नूनं संस्कृतस्य, देशस्य अस्माकं च समुन्नतिरचिरेणैव भविष्यतीति आशासे।

०–२ पाण्डुलिप्याः वर्णनम् —

अत्र क्रमशस्तत्पुस्तकस्य विवरणं मया दीयते। अतीव क्षुद्रकायमिदं पुस्तकं नवागतानां बालानां कृते निर्मितम्। अस्य पुस्तकस्य पाण्डुलिपि-द्वयं ग्रन्थकर्तुः ग्रामात्, तस्य स्वगृहान्मया लब्धम्। ग्रन्थद्वयस्य मंगलाचरणं पुष्पिकाद्वयं च (COLOPHONS) सममेव। किन्तु अन्यत्र बहुषु स्थलेषु वाक्यभेदोऽपि दृश्यते। मया चिन्त्यते यत् प्रथम-पुस्तकस्य

लेखनानन्तरं केनापि तन्नीतम् । कालान्तरेण पुनस्तस्य आवश्यकत्वात् कविना पुनरपि सरलवाक्यैः तादृशं पुस्तकं रचितम् । पाठे संपूर्णभिन्नत्वात् उभयोः पुस्तकयोरुल्लेखः क्रियते । प्रथम-पाण्डुलिपिः प्रथमभागत्वेनात्र विदुषां पुरतः समुपस्थापिता ।

०–२–१ प्रथमपाण्डुलिप्या आकारः १″ × १″.२ मि. मि. भवति। इयं सप्त-तालपत्र-पत्र-विशिष्टा । अस्या उभय-पार्श्वयोः प्रायश्चतस्रः पङ्क्तयः सुन्दरोत्कलाक्षरेण लिखिताः ।

०–२–२ द्वितीय-पाण्डुलिप्याः आकारः १।।′ × १″ ३ मि. मि. भवति । इयमपि सप्ततालपत्र-पत्र-विशिष्टा । प्रत्येकस्य पत्रस्य उभय-पार्श्वयोः चतस्रः पङ्क्तयः सुन्दरोत्कल-लिप्या लिखिता दृश्यन्ते । कुत्र-चिदपि प्रतिलिपिकर्तुः (Copist) नाम नोपलभ्यते ।

समाप्तः उपोद्‌घातः ।

संस्कृत-मञ्जरी ।

प्रथमभागः

श्रीनृसिंहाय[1] नमः ॥

अथ संस्कृतमञ्जरी लिख्यते[2] ॥

इन्दिरानन्द-सन्दोह-कन्दमिन्दीवरेक्षणम् ।
वन्देऽरविन्दजनिना वन्दितं नन्दनन्दनम् ॥
मञ्जरी संस्कृतस्यैषा विचित्र-रचनान्विता ।
बालानां सुखबोधाय **रघुनाथेन** कथ्यते[3] ॥

तत्रादौ येन सुज्ञानिनो भवन्ति तावत्प्रकारो लिख्यते—

वर्तमाने[4] — मया स्नानार्थं गम्यते ।

भविष्यति — न स्नानार्थं गन्तव्यम्, गमनीयम् ।

भूते — गतम्, गत्वा स्थितम्, गतं स्थितम् ।

त्रिकालः प्रयोगः ॥

अयं भाववाची नपुंसकलिंगम् ॥

एकवचने — दीयते ।

द्विवचने — युवाभ्यां दीयते; आवाभ्यां दीयते ।
अमुकाभ्यां दीयते ।
भवद्भ्यां दीयते, आवाभ्यां दीयते ॥

बहुवचने — तैर्दीयते ॥

कुतः समायातो (तं?) भवता?
कुत्र देशे स्थितम्? इति प्रश्नः ॥

---

(१) 'श्रीनृसिंहः' केवलमस्ति पाठान्तरे ।
(२) 'मया लिख्यते' इति पाठान्तरम् ।
(३) 'रच्यते' इति पाठान्तरम् ।
(४) कुत्रापि नोपलभ्यते ।

पुरुषोत्तमात् समायातो (तं?) मया।
पुरुषोत्तमे स्थितम्। इत्युत्तरम् ॥
तत्र कियद्दिनं स्थितं भवता ? इति प्रश्नः।
मासपरिमितं स्थितं मया। इत्युत्तरम् ॥

वर्तमाने — मया उपवनं गम्यते।
भविष्यति — उपवनं गन्तव्यम्।
भूते — गतम्, गतं स्थितम्, गत्वा स्थितम्।

नपुंसकलिंगम् —
वर्तमाने — भुज्यते, भोजनं क्रियते।
भविष्यति — भोक्तव्यम्।
भूते — भुक्तम्, भोजनं कृतम्।

नपुंसकलिंगम् —
वर्तमाने — मया च भोक्तुं गम्यते। भोजनं कर्तुं गम्यते।
भविष्यति — भोक्तव्यम्।
भूते — भुक्तम्। भोजनं कृतम्।

नपुंसकलिंगम् —
कर्मवाची — भोक्तुं गम्यते। भोजनं कर्तुं गम्यते।
भुक्त्वा गम्यते।
भविष्यति — भुक्त्वा गन्तव्यम्, भोजनं कृत्वा गन्तव्यम्।
भाववाची — **वर्तमाने** — शेते।
कर्मवाची — शयनीयम्। शयितव्यम्। शेयम्।

नपुंसकलिंगम् —
कर्तृवाची — एकवचने — अयं शेते।
द्विवचने — इमौ शयाते।
बहुवचने — इमे शेरते।
कर्मवाची — वर्तमाने — दृश्यते।
भविष्यति — द्रष्टव्यम्।
भूते — दृष्टं स्थितम्। वर्तते गृहे।
वर्तमाने — पठ्यते।

भविष्यति — पठितव्यम्, पठनीयम् ।

भूते, नपुंसकलिंगम् — पठितं स्थितम् ।

वर्तमाने — लिख्यते ।

भविष्यति — लेखितव्यम्, लेखनीयम् ।

भाववाची नपुंसकलिंगम् — लिखितं स्थितम् ।

भाववाची — तं प्रति याच्यम् ।

पुराणं श्रूयते ।

भविष्यति — पुराणं च श्राव्यम् । श्रवणीयम् ।

भूते — श्रुतं स्थितम्, श्रुत्वा स्थितम् ।

कर्मवाची नपुंसकलिंगम् — तत्र स्थितम् ।

वर्तमाने — तत्र स्थीयते ।

भविष्यति — स्थातव्यम् । स्थानीयम् ॥

भाववाची — वर्तमाने — याच्यते ।

भविष्यति — याचितव्यम् । याचनीयम् ।

भूते — याचितं स्थितम् । याचित्वा स्थितम् ।

भाववाची — तं प्रति याच्यम् ।

वर्तमाने — मया भ्रमणार्थं गम्यते ।

भविष्यति — गन्तव्यम् मया ।

भूते — गतम् । गत्वा स्थितम् ।

भाववाची नपुंसकम् — भविष्यति

अवश्यमेव (वे?) दं भविर्ष्यति ।

भूते — बहुषु तीर्थेषु स्नानमकारि ।

आरब्धं कर्म समाप्य क्षेत्रान्तरं गतं मया ।

तत्रापि कियत्कालं स्थित्वा एवागतम् ।

कर्मवाची — एकवचने — भवतः कुशलमस्ति ।

द्विवचने — भवतोः कुशलमस्ति ।

बहुवचने — भवतां कुशलमस्ति ।

एकवचने — मम सर्वं कुशलमस्ति ।

द्विवचने — आवयोः सर्वं कुशलमस्ति ।

बहुवचने — अस्माकं कुशलमस्ति।
त्वयि किं तिष्ठति?
मयि किमपि नास्ति।
कर्तृवाची— मया किमप्युच्यते।
भविष्यति — निगदितव्यम्।

पाल्यताम्। पालितव्यं पालयितव्यम् सर्वम्। पालितम्। पालितं स्थितम्। ज्ञातम्। ज्ञातं स्थितम्। ज्ञात्वा स्थितम्।

वर्तमाने — वर्ण्यते। वर्ण्यताम्।
भविष्यति — वर्णयितव्यम्।
भूते — वर्णितम्।
स्त्री कथयति — गृहे मत्पतिः तिष्ठति।
तत्र परपुरुषस्तिष्ठति।
कर्तृवाची — कस्येयं माता भवति।
कस्यायं पिता भवति।
अस्य पितृव्यो वर्तते।
अस्य भार्या वर्तते।
ममोपरि ज्येष्ठभ्राता वर्तते।
वर्तमाने। एकवचने — एषः मे कनिष्ठभ्राता भवति।
द्विवचने — एतौ मम कनिष्ठभ्रातरौ भवतः।
बहुवचने — एते मे कनिष्ठभ्रातरो भवन्ति।
असौ मम पिता भवति।
असौ मम जामाता भवति।
इयं मम भगिनी भवति।
प्रथमपुरुषः कर्तृवाची, भविष्यति —
त्वया अस्याः मुखं वीक्षणीयम्।
वर्तमाने प्रथमपुरुषे — असौ त्वां हसति।
कर्तृवाची — क्षणं प्रतीक्ष्य त्वया स्थेयम्।
भविष्यति — मया क्रियमाणं यद्धनं तद् गृह्यताम्।
गृह्यते मया।

भविष्यति — ग्रहीतव्यम् ।
भूते — गृहीतम् ।
कर्मवाची नपुंसकम् — एतेषाम् अस्मासु स्नेहमौपाधिकम् ।
भवतां सौहार्द्यमस्मासु सा[ह]जिकमस्ति ।
कर्तृवाची — स्थाप्यते ।
भविष्यति — स्थापि (स्थापयि?) तव्यम् । स्थापनीयम् ।
भूते — स्थापितम्, स्थापयित्वा स्थितम् ।
वर्तमाने — भक्षते, (भक्षयति) भक्षताम् ।
भविष्यति — भक्षितव्यम्, (भक्षयितव्यम्) भक्षणीयम् ।
भूते — भक्षितम् ।
वर्तमाने — आकार्यते । आकार्यताम् ।
भविष्यति — आकारितव्यम्, (आकारयितव्यम्) आकारणीयम् ।
भूते — आकारितम् ।
वर्तमाने — भूयते ।
भविष्यति — भवितव्यम् । भवनीयम् ।
भूते — भूतम्, भूतं स्थितम् ।
भाववाची — **वर्तमाने** — ज्ञायते, ज्ञायताम् ।
वर्तमाने — चोर्यते, चोर्यताम् ।
भविष्यति — चोरितव्यम्, चोरणीयम् ।
भूते — चोरितम् ।
कर्मवाची — **वर्तमाने** — उपविश्यते, उपविश्यताम् ।
भविष्यति — उपवेशितव्यम्, (उपवेष्टव्यम्) उपवेशनीयम् ।
भूते — उपविष्टम् ।
भाववाची — अनेनात्र स्थित्वा किं साध्यते ।
भविष्यति — साधितव्यम्, साधनीयम् ।
भूते — साधितं, साधितं स्थितम्, स्थितम् ।
कर्मवाची — **वर्तमाने** — निराक्रियते । निराक्रियताम् ।
भविष्यति — निराकरणीयम् ।
भूते — निराकृतम् ।

भाववाची — अनेन प्रकारेण — अयं विद्यते ।

वर्तमाने — मया बोध्यते । यूयं बोधध्वम् ।

भविष्यति — बोधनीयम् ।

भूते — बुद्धं, बुद्ध्वा स्थितम् ।

वर्तमाने कर्मवाची — स्तूयते, स्तूयताम् ।

भविष्यति — स्तोतव्यम्, स्तुत्यम् ।

भूते — स्तुत्वा स्थितम् ।

वर्तमाने — वन्द्यते, वन्द्यताम् ।

भविष्यति — वन्दितव्यम्, वन्दनीयम् ।

भूते — वन्दितमेव, वन्दित्वा स्थितम् ।

कर्मवाची — **वर्तमाने** — गम्यते, गम्यताम् ।

भविष्यति — गन्तव्यम्, गमनीयम् ।

भूते — गतम् ।

कर्तृवाची — **वर्तमाने** — गुरून् नमति ।

उत्तमपुरुषे — गुरून् नमामि ।

वर्तमाने — भवदीयं कुशलमस्ति ।

प्रथमपुरुषे वर्तमाने — असौ पुस्तकबन्धनं कृत्वा गृहं गच्छति ।

अयं पुरुषः शब्दायते । अयं वैरायते ।

वर्तमाने — एनं पुत्रम् अयं गृह्णाति ।

द्विवचने — इमौ पुत्रौ गृह्णीतः ।

इमे पुत्रान् गृह्णन्ति ।

मध्यमपुरुषवर्तमाने — त्वं वस्त्रं गृहाण ।

कर्तृवाची वर्तमाने — एतेन पुष्पं चीयते ।

चीयेत । चीयताम् ।

वर्तमाने — एतेन काष्ठं छिद्यते ।

भविष्यति — छेत्तव्यम्, छेदनीयम् ।

भूते — छिन्नम् ।

कर्मवाची — श्वः गन्तव्यम् ।

भविष्यति — पार्श्वे गन्तव्यम् ।

तथैव पूर्वेद्युर्गन्तव्यम्। परेद्युर्गन्तव्यम्।
प्रपरेद्युर्गन्तव्यम्। परे अह्नि गन्तव्यम्।
अद्य गन्तव्यम्। इदानीमेव गन्तव्यम्।
अधुना गन्तव्यम्। एकदा गन्तव्यम्।
नवतं गन्तव्यम्।
एतेन सह त्वया परिचीयते, परिचीयताम्।
परिचेयम्।

भाववाची — एतेन खन्यते। खन्यताम्।
भविष्यति — खनितव्यम्। खननीयम्।
भूते — खनितम्।
वर्तमाने कर्मवाची — एतेन निवार्यते।
भविष्यति — निवारितव्यम्।
भूते — निवारितम्।
एतेन गीयते।
भविष्यति — गेतव्यम्।
भूते — गीतम्, गीतं स्थितम्।
अस्य जिह्वाग्रे विद्या नृत्यते।
जगदीशस्य पादसरोजे मन्मनो भ्रमरायते।

कर्तृवाची तुमन्तः — पातुं गच्छति। दातुं कथयति।
भोक्तुं गच्छति। गां दातुम् आह्वयति।
मत् शिरो (सुहृदो?) वचनं सोढुं शक्नोमि।
जलपात्रं धर्तुं शक्तिर्नास्ति।
अन्नं भोक्तुं गच्छति। त्वद्वचनं वोढुं न शक्नोमि।
किञ्चित् कर्तुं मया न शक्यम्।
किं नामधेयं भवतः?
भवतः का शिक्षा?
किंनामानो भवन्तः?
किंदेशीयो भवान्?

किमध्येषि ?
नाशु वै तिष्ठति ।
त्वत्पुत्रस्य किं नामधेयम् ?
मयि कापटचं कृतम् ।
एकस्मिन् विधौ प्रतिकूले सति सर्वे प्रतिकूलाः भवन्ति ।
सूर्ये अस्तंगते सति इतो गन्तव्यम् ।

भूते — अनेन मार्गेण सर्वं साधितम् ।
अयं पुत्रं प्रतिजानीते ।
एते दातुं न शक्नुवन्ति ।
कथं शक्नुवन्ति ?
एभिरहं (यं?) गृह्यते । ग्रहीतव्यम् ।
मयात्र शपथं कृत्वागतम् ।
अष्टोत्तरशतं कृत्वा जप्यते ।

भविष्यति — जप्तव्यम् ।

भूते — जप्तम् ।
सर्वं स्वायत्तीकृतं मया ।
मया किमपि धर्मं नाचरितम् ।
त्वम् अनृतं मा वद । अनेन चारु कृतम् ।
तद्देशं गत्वा स्थितम् । तथैव परिपालितम् ।
एकवारं निशम्य मया गन्तव्यम् ।
इदं समानभागि । इदम् वदन् सन् गतः ।
तत् किं जातम् । तन्न किमपि जातम् ।
तां प्रतीक्ष्य स्थितम् । त्वं मौनमाचर[1] ।
शरणागते जने करुणा विधेया ।
चिन्त्यते, चिन्त्यताम्, चिन्तितव्यम्, चिन्तनीयम् ।
अवश्यरूपं द्रष्टव्यम् ।
न्याये स्थितम् ।

(१) 'मौनम् आचर' इति पाठान्तरम् ।

गर्वं मा कुरु।

गर्वं मा वह।

अस्मिन् विषये किञ्चिदनिष्टं नास्ति।

याचे रथम्।

इत्थं प्रतिवर्तते।

द्विपणी दीयते।

चतुष्पणी दीयते।

पञ्चपणी दीयते।

भविष्यति — दातव्यम्। दत्वा। देया।

एकं रौप्यं ददस्व। द्वयं ददस्व। त्रयं ददस्व।

चतुष्टयं, पञ्चकं ददस्व।

स्वीकुरु।

त्वया उत्तमञ्च कृतम्।

मध्यमं कृतम्।

अधमं कृतम्।

सुरभितरमिदम्।

कियन्तो दिवसाः गताः।

कति दिनानि अतीतानि।

इदं पुस्तकं कस्य?

तावकं पुस्तकं गृहाण।

निवासार्थं खनति कूपम्।

कूपं कर्तुं प्रवर्तते।

त्वया आहितम्।

एकवचनं, नामप्रयोगः — असौ तव किं भवति।

द्विवचने — अमू तव किं भवतः।

बहुवचने — अमी तव किं भवन्ति।

मध्यमपुरुषप्रयोगः — त्वं किं भवसि।

युवां किं भवथः।

यूयं किं भवथ।

गमधातुप्रयोगः —

प्रथमपुरुषप्रयोगः — असौ ग्रामं गच्छति ।

द्विवचने — अमू ग्रामं गच्छतः ।

बहुवचने — अमी ग्रामं गच्छन्ति ।

मध्यमपुरुषप्रयोगः — त्वं ग्रामं गच्छसि ।

युवां ग्रामं गच्छथः ।

यूयं ग्रामं गच्छथ ।

उत्तमपुरुषप्रयोगः — अहं ग्रामं गच्छामि ।

आवां ग्रामं गच्छावः ।

वयं ग्रामं गच्छामः ।

कृधातुप्रयोगः एकवचने — असौ किं करोति ।

द्विवचने — अमू किं कुरुतः ।

बहुवचने — अमी किं कुर्वन्ति ।

मध्यमपुरुष-प्रयोगः — त्वं किं करोषि ।

युवां किं कुरुथः ।

यूयं किं कुरुथ ।

उत्तमपुरुष-प्रयोगः — अहं किं करोमि ।

आवां किं कुर्वः ।

वयं किं कुर्मः ।

प्रथमपुरुषप्रयोगे — असौ गच्छतु ।

अमू गच्छताम् ।

अमी गच्छन्तु ।

मध्यमपुरुषप्रयोगः — त्वं गच्छ ।

युवां गच्छतम् ।

यूयं गच्छत ।

प्रथमपुरुषप्रयोगः — असौ अञ्चति ।

अमू अञ्चतः ।

अमी अञ्चन्ति ।

मध्यमपुरुषप्रयोगः — त्वमञ्चसि ।
युवाम् अञ्चथः ।
यूयम् अञ्चथ ।

उत्तपुरुषप्रयोगः — अहमञ्चामि ।
आवामञ्चावः ।
वयमञ्चामः ।

प्रथमपुरुषप्रयोगः — असौ आगच्छति ।
अमू आगच्छथः ।
अमी आगच्छन्ति ।

मध्यमपुरुषप्रयोगः — त्वमागच्छसि ।
युवामागच्छथः ।
यूयमागच्छथ ।

उत्तमपुरुषप्रयोगः — अहमागच्छामि ।
आवामागच्छावः ।
वयमागच्छामः ।

इति श्रीरघुनाथविरचिता संस्कृतमञ्जरी समाप्ता . . . श्रीः ॥